M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. ______

Ser. 911

Title: Tattvadipika Tikka

911

Z

		Tattvadipa Tika (?)	Title.
			Author.
			Editor.
			Year, Vols.
Sk			Publisher.
Nyaya		Incomplete	Remark.

911

नाऽनागतपरिग्रहः अतीतानागतलिंगविषयकसाध्यव्याप्यवत्तावगाहिपरामर्शजन्यानुमितेरव्यवहितपूर्वलिं
गाभावाद्व्यभिचार इति भावः। न च तत्प्रागभावादीनामेव तत्र लिंगत्वमस्त्विति वाच्यं तदा तेषां व्याप्यत्वेनाग्रहात्॥
एवं यत्र धूलिपटले धूमभ्रमः॥ तत्रत्यानुमितौ सुतरां व्यभिचार इति बोध्यं अत्र कारणत्वं च कार्याव्यवहितपूर्वक्षणाव
च्छेदककार्याधिकरणवृत्तिस्वप्रतियोग्यधिकरणताककार्यसमानाधिकरणताभावप्रतियोगितानवच्छेदकधर्मवत्त्वे
सति कार्याधिकरणे सत्त्वं व्याप्यवत्तावच्छेदकानंगीकारे तु कार्याव्यवहितपूर्वक्षणावच्छेदककार्याधिकरणवृत्त्यभा
वप्रतियोगितानवच्छेदकत्वे सति कार्याधिकरणे सत्त्वं दैशिकाव्याप्यवृत्तिनोरपि संयोगादितदभावयोर्द्वयोरपि नका
र्याधिकरणे कार्याव्यवहितपूर्वक्षणावच्छिन्नत्वमिति न दैशिकाव्याप्यवृत्तिनोः कारणत्वक्षतिरिति बोध्यं एतेनाव्याप्य
वृत्तिक्रियादीनां संयोगादिकं प्रति हेतुत्वोपपत्तये कारणलक्षणे कार्यसमानाधिकरणाभावप्रतियोगिव्यधिकरणत्वनिवेशा
वश्यकत्वेनातीतधूमाद्यभावस्यातथात्वात्तल्लिंगस्य हेतुत्वानुपपत्तिरिति निरस्तं। यत्र विशेष्ये विशेषणं तत्रापि च विशे
षणांतरमिति न्यायेन यत्र परामर्शद्वाराकारणत्वासंभव इयतामनत इत्युक्तं॥ विशेषज्ञानस्य विशिष्टबुद्धिं प्रति हेतुत्वाद्व्या
पारं लक्षयति। तज्जन्यत्वे सतीति। एतावन्मात्रस्य कार्यगतत्वाद्विशेष्यविशेषणमात्रस्य भागवज्ज्ञानसाधारण्याज्जन्येति।
अ इच्छादिवारणाय परामर्शप्रत्यक्षं प्रति परामर्शद्वारा व्याप्तिज्ञानकरणत्ववारणाय चोभयत्र तत्सदोपादानं नव्यास्तु ला
घवात्॥ साध्यज्ञानमभावज्ञानं ज्ञानमात्रं तथा यत्किंचिल्लिंगज्ञानादनुमित्यापत्तिस्तु सामान्यसामग्र्ययादिनियमेन प
रामर्शाभावाद्वारणीयेत्याहुः॥ अनुमित्युत्पत्ति तदभावयोः परामर्शतदभावाभ्यामेवोपपत्तौ तस्यैव तथात्वमस्तु न लिं
गज्ञानादीनां करणत्वं च फलायोगव्यवच्छिन्नं कारणत्वमेवेत्यन्ये लिंगं विभजत इति न च लिंगस्य विभागोनुचितस्तस्या
नुमित्यजनकत्वादनुमितिकरणस्वरूपस्यैवानिरूपितत्वान्निरूपितस्यैव विभागौचित्यादिति वाच्यं लिंगं त्रिविधमिति लिं
गस्यानुमितिजनकज्ञानविषयीभूतं लिंगं त्रिविधमित्यर्थात्। तथा च लिंगज्ञानमेव त्रिविधमिति फलितमिति न दोष
इति भावः अन्वयेनेति। अन्वयव्यतिरेकोभयसहचारत्वं व्यापकविषयताशालि ज्ञानग्राह्यप्रकृतव्याप्तिमत्त्वं प्र
कृतव्याप्तिग्राहकज्ञानविषयत्वं व्याप्योभयसहचारत्वं वान्वयव्यतिरेकित्वमित्यर्थः॥ इदं च व्याप्तिग्राहक

त॰दी॰टी सहचारज्ञानप्रयुक्तमेवान्वयव्यतिरेकित्वादिति मते बोध्यं ननु साध्यसाधनयोरेव व्याप्तिः प्रकृतव्याप्तिशब्देनाप
रुच्यते तदा केवलान्वयव्याप्तिग्राहकसहचारज्ञाने व्यभिचारः॥ अथ तद्व्यतिरेकयोरेव तदा केवलव्यतिरेकव्याप्ति
ग्राहकज्ञान इत्यतो साध्यसाधनयोस्तद्व्यतिरेकयोरपि सा प्रकृतव्याप्तिशब्देनाभिमतेत्याह॥ हेतुसाध्ययोरित्यादि॥ मूले
न्वयमात्रव्याप्तिकमित्यादेरन्वयमात्रेण व्याप्तिर्गृहीता व्याप्तिकमित्यर्थो बोध्यः एवमग्रेपि॥ तथा च प्रकृतव्याप्तिग्राहक
१५ ज्ञानविषयसहचारत्वव्यापकान्वयसहचारत्वकत्वं केवलान्वयित्वमिति तल्लक्षणं बोध्यं॥ ननु घटोऽभिधेयः घटत्वादि
त्याद्यनुमानस्य त्वलुरीयतापत्तिः न च केवलव्यतिरेकित्वं साध्यव्यतिरेकाप्रसिद्धेः॥ अत एव नान्वयव्यतिरेकित्वं न च केवलान्व
यित्वं तस्यात्यंताभावप्रतियोगिलिंगत्वाद्घटत्वस्य तथात्वादित्यभिप्रायिकायाः शंकायास्समाधानमाह॥ दीपिकायां केवलान्वयि
साध्यकमिति॥ तथा च हेतौ व्यतिरेकित्वेपि न क्षतिरिति भावः॥ साध्ये केवलान्वयित्वं निर्वक्ति। अत्यंतेति। नन्वाकाशाभावेऽव्या
प्तिः॥ तत्राकाशरूपात्यंताभावप्रतियोगित्वाद्येमेवं॥ वृत्तिमत्त्वस्याभावविशेषणत्वात्॥ घटाभावो नास्तीति प्रतीत्या तदभावसिद्धा
वपि गगनाभावो नास्तीति प्रतीतेरभावेन तदभावमानाभावः यद्वा तिय दभावाभावबुद्धिरुत्पद्यते तदभाववत्त्वं तत्रेति नियमात्
॥आकाशे प्रतियोगित्वं स्वरूपसंबंधविशेषः नाभावविरहात्मकत्वमिति॥ तथा च वृत्तिमत्त्वं तत्र न देयमेवेति न व्याः॥ न च संयोगा
भावेऽव्याप्तिः प्रतियोगिव्यधिकरणत्वेनाप्यभावस्य विशेष्यत्वात्॥ तत्त्वं च न प्रतियोग्यनधिकरणवृत्तित्वं॥ आकाश
स्याधिकरणाप्रसिध्या तदभावस्यात्यंताखैरि(?) न तत्राव्याप्तेः किंतु यादृशप्रतियोगितावच्छेदकसंबंधसामान्येयत्प्र
तियोगि प्रतियोगित्वया दृशाभावाधिकरणानुयोगित्वोभयाभाववत्त्वं॥ इत्थं वृत्तिमत्त्वं न देयमेव॥ वृत्तिनियामकसं
योगेनाकाशाभावस्य केवलान्वयितया तादृशसंयोगगगनप्रतियोगिकत्वाभावेनोभयाभावसत्त्वेन तदभाव
स्य तथात्वान्नातिव्याप्तेरयोगात्॥ अधिकं चास्मत्कृतकेवलान्वयिवादार्थे द्रष्टव्यं॥ लक्ष्येत्यंताभावाप्रतियोगित्व
रूपलक्षणं प्रतिपादयति ईश्वरप्रमाचेति॥ इदमुपलक्षणं। सामान्यलक्षणाजन्यप्रमाविषयत्वमपि बोध्यं। ननु १५
तत्तत्सदजन्यत्वप्रकारकतद्बोधविशेष्यकेच्छाविषयत्वमेवाभिधेयत्वं वाच्यं॥ न च न प्रमेयं केवलान्वयीत्य

त आह॥ सर्वपदेति सर्वमितिपदेन सर्वविषयकेऽबोधेऽभवत्तीच्छाविषयतायास्तथात्वमिति भावः व्यतिरेकि
णमिति। प्रकृतव्याप्तिग्राहकज्ञानविषयसहचारत्वव्याप्यव्यतिरेकसहचारत्वकत्वरूपतल्लक्षणाक्रांतं॥ उक्त
लक्षणस्य व्यभिचारमसंभवं च वारयितुं शंकते। नन्विति। इतरभेदः जलादित्रयोदशत्वावच्छिन्नप्रतियोगिताक
भेदः। तत्तद्भेदकूटं वा। आद्य इति। निश्चितसाध्यवति हेतुवर्तितेन वा आद्ये तद्व्यत्रेति प्रसिद्ध इति इतरभेद इति
पूर्वेणान्वयः। प्रसिद्धः निश्चितः तत्र निश्चितसाध्यवति। अन्वयित्वमिति। अन्वयसहचारवत्त्वं स्यादित्यर्थः। तथा
च प्रकृतव्याप्तिग्राहकज्ञानविषयसहचारत्वव्यन्वयसहचारि व्यतिरेकसहचारत्वाभावाद्व्यभिचार इति
भावः अथान्वयसहचारज्ञानस्य सत्त्वेपि तस्य व्यतिरेकव्याप्तिग्राहकत्वे मानाभावः व्यतिरेकसहचारज्ञा
नेनैव तदुपत्तेरिति चेत्तथापि व्यतिरेकसहचारज्ञानेन व्यतिरेकव्याप्तिरेवान्वयसहचारज्ञानसत्त्वे तेनाप्य
न्वयव्याप्तिर्गृह्यत एव। एकत्र पक्षपातेनिदानाभावात्। तथा च प्रसिद्धानुमानमिवान्वयव्यतिरेकेचैतदपीति
भावः। द्वितीये त्वाह। असत्त्व इति। तत्रेत्यनुषज्जते। असाधारण्यमिति। सर्वसपक्षव्यावृत्तत्वेनासाधारणलक्ष
णाक्रांततयासद्धेतुत्वेन विभजनीयमिति भावः द्वितीये नेति पक्षे साध्यज्ञानाभावादिति पक्षे तस्य संदिग्धत्वेन
तदतिरिक्ते निश्चयाभावादिति भावः॥ इदं च अप्रसिद्धसाध्यकेपि साध्यविशेषणकानुमितिस्वीकारेण अन्यथा साध्य
विशेष्यकानुमितौ तदृशानस्यानपेक्षितत्वेनासंगत्यापत्तेः। साध्यविशेष्यकानुमित्युपगंतृमते साध्यप्रसिद्धेरावश्य
कतामाह। प्रतियोगीति। ननु संदेहस्यानुमानांगत्वे आत्मनीतरभेदानुमितिर्न स्यात्। वेदवाक्ये जनिते तरभेदप्रका
रकनिश्चयस्य सत्त्वेन तत्कोटिसंदेहाभावात्तथा च कथं संदेहः। पक्षलक्षणमित्याह। तत्र श्रवणानंतरभाविमनन
स्थले वेदवाक्यैः आत्मनो निश्चितत्वेन इतरभेदप्रकारकनिश्चयविषयत्वेन। आंतरस्थले नुपपत्तिमुद्धाट्यन्नाहुण(?)
स्थलेपि तानाह। किंचेति। यद्वाशाद्वामिकायाः सिद्धेः प्रतिबंधकत्वमुपपाद्य प्रत्यक्षात्मिकास्तदुपपादयति किंचेति। प्रत्यक्षे
पीत्यपि कारस्तत्रेत्यनंतरं योज्यः समाधत्ते नेति। पक्षताश्रयत्वस्यैवेति एतत्तत्त्वं प्रपंचितमधस्तात्। अव्यभिचार

दीधि- विशिष्टपक्षधर्मत्वादिनासद्धेतौ निरूपिते व्यभिचारपक्षधर्मत्वादिनः सद्धेतोरपि सत्त्वेन प्रसंगाद्विजयत्वेऽनिर्णयरू
पतत्कार्यकारित्वाद्सद्धेतुनिरूपणानंतरं तदाभासनिरूपमित्याशयवानाह। एवं सद्धेतुमितिसपरिकरं सद्धेतु
मित्यर्थः। तत्र यन्मूले हेत्वाभासाः निरूप्यंत इत्यध्याहृत्य योजनाबोध्या॥ वस्तुघयादौ प्रसिद्धस्यैवेतरभेदस्य
२६ साध्यतास्वीक्रियते। नचैवं सिद्धसाधनं। पक्षतावच्छेदेनैव साध्यसिद्धेरुद्देश्यत्वेन तत्सामानाधिकरण्येन त
सिद्धेरकिंचित्करत्वात्। नचैवमयतः सिद्धधंसो नस्या दोषत्वापत्तिरितिवाच्यं। एकपक्षतावच्छेदकावच्छे
देवास्तनुमतेरुपष्टत्वात्। नानापक्षतावच्छेदकस्थल एव तदंगीकारात्। यथावाङ्मनसेतिनित्यत्वेन तैस्त्या
दित्यादौ वागमितेति सिद्धरहस्यायासिध्यानोभयधर्मावच्छेदेनानित्यत्वानुमितिरिति तेन जलादौ त्रयोदशत्वा
वच्छिन्नप्रतियोगिताकभेदादेः साध्यत्वेपि साध्यतावच्छेदकावच्छिन्नसाध्यस्य तादृशप्रतियोगिनोऽप्रसिद्धेस्त
द्विशिष्टानुमितावभावग्रहे तु त्वेपि न क्षतिः। न चान्वयित्वासाधारण्योपक्षतावच्छेदावच्छिन्नपक्षतातिरिक्तता
दृशानिश्चितसाध्यवत्तिसाध्यस्य सत्त्वादिना तदुपगमात्॥ अत्र व्यतिरेकव्याप्तिज्ञानस्याप्यन्वयव्याप्तिज्ञानस्य २५
वानुमितिजनकत्वं इतरभेदज्ञानशून्यकाले स्वातंत्र्येण तज्ज्ञानसत्त्वे चेतरत्वव्यापकीभूताभावप्रतियोगि
पृथिवीत्ववती पृथिवीत्वादिपरामर्शादितरभेदविशेष्यकतद्विशेषणकानुमित्योः सर्वजनानुभवसिद्धत्वा
दित्यवधेयं। व्यतिरेकनिष्ठव्याप्तेः स्वाश्रयव्यापकीभूताभावप्रतियोगित्वनिरूपकाभावप्रतियोगित्वादिसं
बंधेन तादृशव्याप्तिविशिष्टप्रकृतहेतुमत्तानिश्चयस्य कारणत्वापेक्षया स्वरूपसंबंधेन सामानाधिक
रण्यरूपान्वयव्याप्तिविशिष्टतादृशज्ञानस्य तथात्वे लाघवेन सर्वमस्त्वंत्रैवान्वयव्याप्तिज्ञानमेवत
था। इत्थंच उभयविधसहचारादपि संशयपक्षत इत्यार्याः। मणिकृतस्तु व्यतिरेकसहचारस्य अन्वयव्या
स्यघटकतया विशेषणत्वाभावेन तज्ज्ञानविधया तत्र हेतुत्वासंभवात् साध्यानुमितौ प्रसेकं नचस

२

हचारस्याप्युभयविधव्याप्तिज्ञानयोरपि हेतुत्वं॥ नच व्याप्यतावच्छेदकरूपेणानुमितौ व्यापकस्य भाननियमे
न कथं साध्याभाववनिष्ठहेत्वभाववनिरूपितव्याप्तिज्ञानात्साध्यविधेयकानुमितिनिरस्तं॥ अन्वयव्याप्तिज्ञा
नस्थल एव तस्यांगीकारादित्यास्तां विस्तरः॥ उभयलक्षणमिति। पक्षसत्त्वादिपंचरूपोपपन्नस्य वस्तुतोलिंग लिंग२
मत्त्वेन पक्षस्वरूपग्रहणानंतरं तद्रूपग्रहासंभवेन कथायां विशिष्टलिंगस्य प्रयोगासंभवादिति भावः॥ एव
मन्यत्रापि बोध्यं॥ ननु संदेहस्यानुमानांगत्वे आत्मनीतरभेदानुमितिर्नस्यात्॥ वेदवाक्यजनितेतरभेदप्रका
रकनिश्चयस्य सत्त्वेन तत्कोटिकसंदेहाभावात्तथा च कथं संदेहः॥ पक्षलक्षणमित्याह॥ नन्विति तत्रश्रवणानंत
रभाविमननस्थले वेदवाक्यैः॥ आत्मावारेत्यादिवेदवाक्यैः आत्मनो निश्चितत्वेन इतरभेदप्रकारकनिश्चयविषय
त्वेन॥ आं तरस्थलेनुपपत्तिमुद्धृत्य ब्रह्मस्थलेपि तामाह॥ किंचेति। मद्वाशाद्वाप्तिकायाः सिद्धेः प्रतिबंधकत्वमुपपाद्यप्र
त्यक्षात्मिकायास्तदुपपादयं किंचेति॥ प्रत्यक्षेपीत्यधिकारस्तत्रैत्यनंतरं योज्यः॥ समाधत्तेनेति॥ पक्षताखंडे स्थितेवेति॥ एतत्तत्त्वंप्र
पंचितमधस्तात्॥ अव्यभिचारविशिष्टपक्षधर्मत्वादिनासद्धेतौ निरूपिते व्यभिचारापक्षधर्मत्वादिनाऽसद्धेतोरपि स्मृतत्वेन
प्रसंगाद्विजयत्वनिर्णयरूपतत्कार्यकारित्वाच्चसद्धेतुनिरूपणानंतरं तदाभासनिरूपमित्याशयवानाह॥ एवं सद्धेतु
मितिसपरिकरं सद्धेतुमित्यर्थः॥ तत्र यन्मूले हेत्वाभासाः निरूप्यंत इत्यध्याहृत्य योजनाबोध्या॥ ईश्वरप्रनाचेति॥
इदनुपलक्षणं। सामान्यलक्षणा जन्यप्रमाविषयत्वमपि बोध्यं॥ ननु तत्पदं जन्यत्वप्रकारकतत्तद्बोधविशे
ष्यकेच्छाविषयत्वमेवाभिधेयत्वं वाच्यं। तच्च न प्रत्येकं केवलान्वयीत्यत आह॥ सर्वपदेति। सर्वमितिपदे
न सर्वविषयकेच्छाया अभावत्वितीच्छाविषयतायास्तथात्वमिति भावः अतिरेकिणमिति। प्रकृतव्याप्तिग्राह
कसाधनविषयसहचारत्वव्यापकव्यतिरेकसहचारत्वकस्वरूपतल्लक्षणां कां तां उक्तलक्षणस्य व्यभिचारम
संभवं च वाराथितुं शंकते। नन्वितरभेदः जलादित्रयोदशत्वावच्छिन्नप्रतियोगिताकभेदः। तत्तद्भेदकूट

त॰दी॰टी॰ वाआद्य इति निखिलसाध्यवति अन्वयित्वमिति। अन्वयसहचारवत्त्वं स्यादित्यर्थः तथा च प्रकृतव्याप्तिग्र
हकज्ञानविषयसहचारज्ञानस्य सत्त्वेपि तस्य व्यतिरेकव्याप्तिग्राहकत्वे भानाभावः व्यतिरेकसहचार
ज्ञानेनैव तदुपपत्तेरिति चेत्तथापि व्यतिरेकसहचारज्ञानेन व्यतिरेकव्याप्तिरेवान्वयसहचारज्ञानसत्त्वे
९७ तेनाप्यन्वयव्याप्तिर्ग्रह एव। तत्कत्वपक्षपातेनिदानाभावात्। तथा च प्रसिद्धानुमानमिनान्वयव्यति
रेक्येवैतदपीति भावः॥ द्वितीये त्वाह। असत्व इति। तत्रैव नुपज्जते। असाधारण्यमिति। सर्वसपक्ष
व्यावृत्तत्वेनासाधारण्यलक्षणाक्रांतं तया न सद्धेतुत्वेन विभजनीयमिति भावः। द्वितीये नेतिपक्षेति
॥साध्यज्ञानाभावादिति पक्षेतस्य संदिग्धत्वेन तद्भिन्नतिरिक्तेनिश्चयाभावादिति भावः इदं च अप्रसिद्धसा
ध्यकेपि साध्यविशेषणकानुमितिस्वीकारेण अन्यथा साध्यविशेष्यकानुमितौ तद्ज्ञानस्यानपेक्षित
त्वेनासंगत्यापत्तेः॥ साध्यविशेष्यकानुमित्यभ्युपगंतम तेसाध्यप्रसिद्धेरेवावश्यकत्वमाह॥ प्रतियो
गीति। व्यतिरेकव्याप्तिज्ञानमपीति व्यतिरेकयोर्व्याप्तिज्ञानमपीत्यर्थः। तथा च साध्यज्ञानमंतरात ९८
व्यतिरेकग्रहासंभवः। तदभावे चाश्रयग्राहभावाद्व्याप्तिग्रहो न स्यादिति भावः। नहि कोपि धर्मिण
मगृहीत्वैव धर्मं गृह्णातीति। साध्यविशिष्टानुमित्यभावज्ञाने च न साध्यतावच्छेदकावच्छिन्नसाध्य
स्य प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिनश्च प्रसिद्धिः प्रयोजिका परं तु साध्यस्य प्रतियोगिनश्चानि
श्चितसाध्यतावच्छेदकावच्छिन्नसाध्यवतिसाधनस्य सत्त्वासत्त्वयोरेवान्वयित्वासाधारण्ययोः
प्रयोजकत्वमित्याशयेन समाधत्ते तिनेति। जलादित्रयोदशेत्यादि॥ जलमेतादृशानां त्रयोदशानामिति

विग्रहेण जलादिप्रतियोगिकानां चतुर्दशानामन्योन्याभावानामित्यर्थः॥ त्रयोदशस्विति। जलादित्रयोद
शस्वित्यर्थः ननु जलादित्रयोदशस्वंतर्गततेजस्त्वे तद्भेदग्रहासंवादाह॥ प्रत्येकमिति। मेलनमिति एका
धिकरणसंबंध इत्यर्थः साध्यत इति। एकाधिकरणसंबंधतादृशभेदकूटसाध्यत इत्यर्थः अन्यथा इ
तरभेदाभावे व्याख्युपदर्शनस्यासंगत्यापत्तः। उक्तदोषनिरासप्रकारं दर्शयति। त्रयोदशत्वावच्छिन्न
साध्यस्येति। जलादिप्रतियोगिकानां चतुर्दशभेदानां कूटस्येत्यर्थः एकाधिकरणवृत्तित्वाभावादि
ति। तत्त्वेनाप्रमितत्वादित्यर्थः॥ नान्वयित्वासाधारण्य इति॥ अनुमितेः पूर्वं निखिलसाध्यतावच्छेदकावच्छि
न्नवतो धर्मिण एवाप्रसिध्यत्वत्॥ अत्र हेतोः सत्त्वासत्त्वनिबंधनो न दोष इति भावः॥ हेत्वाभासाः हेतुव
दवभासंत इति व्युत्पत्त्या च व्यभिचारादयो दोषास्तद्वंतो हेतवश्चासामान्यधर्मप्रकारकज्ञानाभावे विशेषध
र्मप्रकारकजिज्ञासानुदयेन विभागासंभवात्॥ तत्संपादनाय तेषां सामान्यलक्षणमाह दीपिकायां। अ
नुमितीति तत्रानुमितिपदं साध्यव्याप्यहेतुमान्संबंधः साध्यवान्निसनुमितिपरं। अनुमितिनत्कारण
ज्ञानान्यतरपरं वा। तेन व्यभिचारज्ञानस्यानुमित्प्रतिबंधकत्वेपि न क्षतिः। पर्वतो वह्निरिति बाधभ्रमा
न्नतद्धेतुकानुमितिप्रतिविषयितया प्रतिबंधकतावच्छेदकं यत्त्वं हेतुदोषत्वमिति फलितोर्थः तेन पर्वतत्वेन
पक्षत्वे वह्नित्वेन साध्यत्वे विशिष्टधूमत्वेन हेतुत्वेन हेतुत्वे पर्वतस्य केवलधूमस्य विशिष्टधूमस्य चा कांचन
मवायत्वाभावो महानसीयवह्निधूमभ्रन्यत्वं वह्निव्यभिचारोपर्वतीयवह्निव्यभिचारो न दोष इति बोध्यं॥
मनुमित्युदयेनाप्रामाण्यज्ञानानास्कंदितत्वस्यावश्यं निवेशनीयतया तदनास्कंदितदोषविषयकत्वस्यैव तस्

त.दी.टी. यीयस्वाधिकरणत्वेन गृहीतव्याप्यत्वादसंभव इति वाच्यं। विषयितायां प्रतिबंधकतायां वा ऽनाहार्यज्ञानास्कंदित
त्वविशेषणात् एवं च तादृशविशिष्टविषयितासंबंधेन तद्विशिष्टप्रतिबंधकतायां वा यदवच्छेदकतापर्याप्त्य
धिकरणं तत्त्वमिति फलितं। नन्ववच्छेदकत्वं नान्यूनवृत्तित्वं ह्रदो वह्निमान्धूमादित्यादौ बाधे व्याप्तेः॥ अनुमि
१८ तिप्रतिबंधकताश्रयेऽप्रामाण्यज्ञानानास्कंदितदोषज्ञाने दोषविषयितायाः सत्त्वेन न्यूनवृत्तित्वात्॥ नाप्य
नतिरिक्तवृत्तित्वं तेरिक्तवृत्तित्वात्॥ अत एव न स्वरूपसंबंधविशेषः॥ अप्रामाण्यज्ञानास्कंदितत्वं दोषवि
शेषणमित्युक्तौ चोक्त एव दोषः इति चेत् तर्हि स्वव्यक्तौ पर्याप्तिविशेषणं न च साध्यादावतिप्रसक्तिः तद्विषयता
यातिरिक्तवृत्तित्वात् न च पर्वतवह्न्यभावोभयविषयकज्ञानस्यानुमितिप्रतिबंधकतया तद्विषयतायातिरिक्त
त्वादेव नोक्तभ्रमादौ वसद्धेतावतिप्रसक्तिरिति यथार्थपदमनर्थकमिति वाच्यं। तथापि भ्रांतायव ह्न्यभाव
निष्ठप्रकारतानिष्ठविशेष्यतायाः ऽतिरिक्तवृत्तित्वात्॥ न च प्रमेयत्वविशिष्टव्यभिचारेतिव्याप्तिवारणाय
त्तद्विषयतायाः प्रकृतानुमितिप्रतिबंधकतानतिरिक्तवृत्तिरिक्तवृत्तित्वादिति वाच्यं॥ प्रकृतानुमितिप्रतिबंध १८
कतावच्छेदकांतराघटितघटितत्वेन विशेषणात्॥ अंतरसंस्वाविषयकप्रतीतिविषयत्वं न तद्भिन्नत्वं।
उक्तस्थले दोषावारकत्वात्। तथा च स्वाविषयकप्रतीतिविषयत्वादृशावच्छेदकाविषयप्रतीतिविषय
त्वं समुदितार्थः॥ भवति हि प्रमेयविशिष्टव्यभिचारविषयप्रतीतिविषयः केवलव्यभिचारस्तदविषयकप्र
तीतिविशिष्टः न प्रमेयत्वविशिष्टव्यभिचार इत्यतिव्याप्तिवारणं॥ व्यभिचारस्य साध्यादिघटितत्वदत्तादृशेति
॥अनुमितिप्रतिबंधकतावच्छेदके स्वर्थः स्वाविषयप्रतितिविषयस्वसमानजातीयप्रतिबंधकतावच्छेदकं
यद्यत्तदविषयस्तदविषयकप्रतीतिविषयत्वमिति पुनर्निष्कर्षः साजात्यं चाभासतावच्छेदकव्यभिचारत्वादि

नाबोध्यं स्वाविषयकप्रतीतिविषयस्वसमानजातीयो यो वह्निसमानाधिकरणाभावप्रतियोगितावा
च्छेदकसाध्यतावच्छेदकरूपो व्यभिचारस्तविषयकप्रतीतिविषयत्वं धूमावह्निरूपव्यभिचारादावि
तिलक्षणसमन्वयः। एवमन्यत्रापि सुधीभिरूह्यं एतेन धूमव्यभिचारि वह्निमान्पर्वतो धूमवान्च ह्रदैरित्या
दौ धूमाभाववत्तादृशपक्षात्मके बाधे ऽव्याप्तिः व्यभिचाररूपतादृशावच्छेदकघटितत्वादिति निरस्तं।
अत्रेयं न केनापि संबंधेन हेतौ दोषत्वं बोध्यं। तेन बाधितहेतावपि दुष्टत्वव्यवहारस्योपपत्तिः॥ न
व्यभिचारिहेतौरेवदोषत्वे वह्निमान्धूमादित्यादौ व्यभिचारिद्रव्यत्वाश्रयस्य धूमस्यापि तथापत्तिरिति वा
च्यं यादृशदोषविषयकंज्ञानं यल्लिंगकानुमितिप्रतिबंधकं तद्धान्सहेतुर्दुष्ट इतिस्वीकारात्॥ न चैवम
पि निर्वह्निपर्वतो वह्निमान्पर्वतत्वादित्यादौ न कोपि हेत्वाभासः स्यात्तादृशानुमितेरप्रसिद्धत्वादि
ति अप्रामाण्यज्ञानानास्कंदितविरोधितासाकियद्विषयकनिश्चयाव्यवहितोत्तरानुमितिस्तनाहार्यमाना
त्मान्यतरत्वव्यापकोपक्षतावच्छेदकविशिष्टपक्षविशेष्यतानिरूपितसाध्यतावच्छेदकविशिष्टसाध्य
विषयतयानिरूपितवैशिष्ट्यविषयत्वस्य साध्यतावच्छेदकविशिष्टसाध्यनिरूपितव्याप्तिविशिष्टहेतुताव
च्छेदकविशिष्टहेतुमत्तावगाहित्वस्य च द्वयोर्व्यतिरेकस्तत्वस्यविवक्षितत्वात्। अस्ति च ह्रदो निर्वह्निरिति
निश्चयाव्यवहितोत्तरतादृशानां ह्रदत्वविशिष्टे वह्न्यभावावगाहित्वाभावनियमात्तादृशोभयाभाव
नियमः अप्रामाण्यज्ञानदृशायां तदुत्तरतादृशज्ञाने ह्रदो वह्निमानिति वगाहित्वसत्तादृशास्कंदितांतनि
श्चयविशेषणं॥ ह्रदो वह्निमान्न वेति संशयानंतरं तादृशविगाहित्वस्य त्वान्निश्चयइति॥ तादृशबा
धादिज्ञानाभावकालीनतादृशज्ञाने तथावगाहित्वसत्त्वादव्यवहितोत्तरेति॥ शंखोनपीतइत्यनुमा
नि कनिश्चयाव्यवहितोत्तरशंखः पीत इति चाक्षुषे तथावगाहित्वसत्त्वात्॥ शंखः पीतः शंखत्वादित्य

त॰ दी॰ टी॰ स्वबाधेपीतत्त्वाभाववत्त्वरूपात्मके ऽव्याप्तिरतो मानसेति। तादृशनिश्चयाव्यवहितोत्तराहार्यमानसज्ञाने तथा
वगाहित्वसत्त्वादनाहार्यत्वं च जन्यैच्छाजन्यत्वदोषजन्यत्वं च तदभावकूटवत्त्वमनाहार्यत्वं। तेनाहं गौर
आत्मत्वादित्यादौ नाहं गौर इत्यानुमानिकबाधनिश्चयोत्तरं अहं गौर इति दोषविशेषजन्यमानसज्ञाने ताद
शावगाहित्वसत्त्वेपि तादृशबाधेनाव्याप्तिः दोषविशेषश्च मानसभ्रमजनकत्वेन विशिष्य कर्तव्यः अतोन
१९ मानसपदव्यर्थता। आश्रयासिद्धसंग्रहाय पक्षतावच्छेदकविशिष्टेति। साध्याप्रसिद्धेर्बाधप्रतिरोधयोः सं
ग्रहाय साध्यतावच्छेदकेविशिष्टेति। साध्यविषयितानिरूपितवैशिष्ट्येति च। सव्यभिचारसाधनाप्रसिद्धिसाध
नारूपासिद्ध्यादीनां संग्रहाय साध्यतावच्छेदकेत्यादि यद्यप्यास्ति वक्तुं वक्तव्यं। तथापि ग्रंथगौरवभियानास्मा
भिर्विचार्यते। अत्र पक्षतावच्छेदकवैशिष्ट्यं वैज्ञानिकं न तु वास्तवं ग्राह्यमिति संक्षेपः। तत्रेति। तेषु साधारणा
दिषु मध्य इत्यर्थः। मूलेसाध्याभाववद्वृत्तिरिति। साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तिरित्यर्थः। तेन यत्किं
चिद्वह्निविरहवति हेतौ धूमस्य वृत्त्या वह्निनाति व्याप्तिः। अन्यत्तु सर्वं व्याप्तिनिरूपणवद्बोध्यं न च संयोगी द्रव्यत्वादि
वारणाय प्रतियोगिव्यधिकरणत्वनिवेशनीयत्वेन गौरवमिति वाच्यं। यतो साध्येनाभावः साध्यवत्प्रतियोगिता
कः साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभाव इति यावत्। तथा च मूलोक्तोन्योन्याभावघटितलक्षणए
वतात्पर्यान्न कोपि दोष इति भावः न च साध्यवदन्योन्याभाववद्वृत्तित्वमित्यन्योन्याभावबोधकशब्देन किमिति १९
नोक्तमिति वाच्यं। लक्षणद्वयबोधनाय तथाभिधानात्। न च विरुद्धेति प्रसक्तिरिति शंक्यं। साध्यसमानाधिकरण
त्वेन विशेषणात्। उपाधेयसंकरेप्युपाधेरसंकरात्तस्य तत्साधारण्येपि क्षतिविरहाच्च। सर्वेत्तु पक्षेति पर्वतो
वह्निमान्पर्वतमहानसान्यतरत्वादित्यादौ यत्किंचित्सपक्षव्यावृत्तिसद्धेतावतिव्याप्तिवारणाय सर्वेति सपक्षत्वं
च निश्चितसाध्यवत्त्वं तन्निष्ठात्यन्ताभावप्रतियोगित्वं तन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वं वा। व्याव
तत्वं। सर्वसपक्षविपक्षव्यावृत्तो ऽसाधारण इति तु न सत्। विपक्षनिवेशे प्रयोजनाभावात्। शब्देति। न चानित्यः

५

शब्दः शब्दत्वादित्यादावतिव्याप्तिः पक्षे साध्यस्य संदिग्धत्वेन सर्वैर्निश्चितसाध्यवद्भ्यो घटादिभ्यः शब्दस्य व्यावृत्त्या
दिति वाच्यं। तस्यानित्यत्वेसत्वे तदानीमिष्टापत्तेरिति संप्रदायविदः। नवीनास्तु असाधारणस्य सत्प्रतिपक्षयोर
नित्यदोषत्वेनासंभव दुष्टिकं। तथा सति सद्धेतोनपि हेत्वाभासत्वापत्तेः। इष्टापत्तौ बाधभ्रमेणानुमितिप्रतिबंधा
स्वा द्बाधस्याप्यनित्यदोषत्वापत्तिः बाधभ्रमेणानुमितिप्रतिबंधमात्रं लिंगं तु न दृष्टमिति चेत्समं प्रकृतेपि तस्मात्स
र्वेत्यादेः सर्वपदस्य सामान्याभावबोधकतया सपक्षपदस्य निश्चयाविवक्षेणेन साध्यवदर्थकतया सा
ध्यवद्वृत्तित्वसामान्याभाववत्त्वमर्थः साध्यासमानाधिकरण इति यावत्। साध्यतावच्छेदकावच्छिन्नेत्या
दिनिवेशानं पूर्ववदित्तिप्राह। अन्वयेत्यादि। तत्त्वं च किंचिद्विशेष्यकनिश्चयाविषयसाध्यकत्वे सति किंचि
द्विशेष्यकनिश्चयाविषयसाध्याभावकत्वं किंचिद्विशेष्यकनिश्चयविषयाभावप्रतियोगित्वसामान्याभा
ववत्साध्यकत्वमतिपुनर्विशेष्यदलनिष्कर्षः केवलान्वयिकेवलव्यतिरेकिणोर्वारणाय॥ यथायथं दल
द्वयं बोध्यं। सत्यं तेपि। साध्यनिष्ठ एव तादृशनिश्चयविषयत्वसामान्याभावो बोध्यः। तेन यत्किंचिद्विशेष्य
कनिश्चयाविषयकसाध्यकत्वस्य सत्त्वे तावपि सत्त्वेपि न क्षतिः। इदमेव केवलान्वयिधर्मावच्छिन्नपक्षकत्वं
गायंति। साध्याभावव्यापकहेतुरिति॥ साधारणवारणाय व्याप्तं इति॥ न चानित्यः शब्दः शब्दत्वादित्यादावतिव्या
प्तिः। साध्याभावस्यानित्यत्वस्य शब्दत्वं हि व्याप्यमेवेति वाच्यं। उपधेयसंकरेप्युपाधेरसंकरादिति न्यायेन तस्य त
साधारण्येनापि क्षतिविरहात्। वस्तुतस्तु। साध्याभावव्याप्तस्य प्रायशो साध्यासमानाधिकरणत्वनियमेन त
थैवोसाध्यसमानाधिकरणो हेतुर्विरुद्ध इत्यर्थः स्यो। तेन वक्ष्यमाणविरुद्धत्वस्येत्यादि व्याख्याविरोधः न चैवं
व्याप्तिपदं किमर्थमिति चेत्। अव्यक्तिसाध्यवद्धेत्वस्यन्यतरत्वरूपे केषांचिल्लक्षणाक्रांतस्यानुपसंहारि
णो वारणार्थमित्येव हि। दीपिकायां। दूषकतावीजशरीरव्याप्तिनिवेशे प्रयोजनाभावात्समानाधिकरण्याभा

वमात्रस्य दूषकताबीजत्वं प्रदर्शितमिति न विरोधस्तस्य बोध्यं। साध्याभाववत्साधकमिति। साध्याभावव्याप्य
त.दी.टी. हेत्वंतरकत्वं सत्प्रतिपक्षत्वमित्यर्थः। बाधविशेषसाध्यविशेषकत्वेनोपन्यस्तस्यापि साध्याभावव्याप्यत्वा
दतिव्याप्तिवारणाय हेत्वंतरमिति। अप्रामाण्यप्रकारकग्रहाविशेष्यसाध्यव्याप्यत्वप्रकारकोपस्थितिकालीनसा
२९ ध्याभावव्याप्तिप्रकारकोपस्थितिविषयः सदिति केचित्। एतत्तत्त्वं चाग्रे स्फुटी भविष्यति। आश्रयासिद्धाद्यन्य
तमत्वरूपतत्सामान्यलक्षणस्य स्वयमभ्यूहयितुं शक्यत्वात्तल्लक्षणमुपेक्ष्य विभागमाह। असिद्धस्त्रिविधः। य
द्यात्तल्लक्षणासंकलितमेव विभागमाह। असिद्धस्त्रिविध इति। तथा च विधत्वेनैव निरुक्तलक्षणमुक्तमिति
भावः। साधारण्यासाधारण्यानुपसंहारित्वभिन्नत्वे सति। विषयितया परामर्शप्रतिबंधकतावच्छेदकरूपव
सिद्धिः। तद्वानसिद्ध इति केचित्। तन्न। व्याप्यत्वासिद्धाव्याप्तेः। अव्याप्यत्वासिद्धेरपि फलतो साधारण्यपर्यव
सानात्। उदाहरणमुखेनाश्रयासिध्यादिलक्षणं दर्शयति। आश्रयासिद्धो यथेति तत्त्वं च पक्षवृत्तिपक्षताव
च्छेदकाभाववत्त्वं पक्षतावच्छेदकाविशिष्टपक्षे साध्यादिमत्ताग्रहविरोधिग्रहविषयतावच्छेदकरूपवत्त्वमिति
फलितार्थः। स च नास्त्येवेति। अरविंदस्य प्रसिद्धत्वादरविंदे गगनीयत्वं नास्त्येवेत्यर्थः। सविशेषणे हीत्यादिन्या २०
येन न अर्थस्य विषयस्य विशेषणे त्वयेन ताद्दशालाभ[?] इति भावः। स्वरूपासिद्धो यथेति। तत्त्वं च पक्षे हेतुता
वच्छेदकावच्छिन्नहेतोर्द्वयोर्वैशिष्ट्यग्रहविषयतावच्छेदकरूपत्वं। असिद्धिभिन्नानां सर्वेषां तल्लक्षणेनैव वा
रणात्। असिद्धिविशेषयोस्तु ग्रहविषयतानवच्छेदकत्वेन च। अत्र शब्दो गुणः चाक्षुषत्वे सति जन्यत्वाज्ज
न्यत्वे सति चाक्षुषत्वात्तारत्वात्कांचनमयत्वविशिष्टशब्दत्ववत्त्वाद्वेत्यादिरपि विशेषणाप्रसिद्धिविशेष्यासिद्धि
ना भागासिद्धिसाधाप्रसिद्धीनामत्रैवांतर्भाव इति नाधिकहेत्वाभासत्वमिति मंतव्यं। साधनाप्रसिद्धिसाध्याप्रसिद्ध
द्व्योर्व्याप्यत्वासिद्धावेवांतर्भावः। साधनसाध्ययोः साधनसाध्यत्वयोरवच्छेदकाभाववत्त्वे साधनतावच्छे
दकविशिष्टेत्यादिनिरुक्तव्याप्यत्वसंभवादित्यपि वदंति। ननु व्यभिचारज्ञानद्वारा व्यभिचारज्ञानं प्रति प्रतिबंधकत्वात्सो
पाधित्वज्ञानमित्युपाधिरिति कथं न हेत्वाभासांतरमत आह। सोपाधिक इति इदमुपलक्षणं। साध्याप्रसिद्धस्य

६

लेपि व्याप्यत्वासिद्ध एवेति द्रष्टव्यं॥ व्याप्यत्वमसिद्धं यत्रेति व्युत्पत्त्या व्यभिचारीत्यर्थः। तथा चोपाधेः परमुखनिरीक्ष्यकत्वे
न साक्षादनुमितितत्करणज्ञानान्यतरप्रतिबंधकत्वाभावान्न हेत्वाभासत्वमिति भावः। न चैतस्य साधारणसाधार
ण्यात्कथमतिरिक्तत्वमिति वाच्यं। तथात्वेपि साधारण्यविरहिणि साध्याप्रसिध्यादौ सत्वे नोपाधेरसाधारण्येन चातिरिक्तत्वं
संभवात्॥ नीलधूमोपि व्याप्यत्वासिद्ध एवेत्यपि वदंति। ननु नीलधूमे कथं व्याप्यत्वाभाव इति चेत्स्वस्थहृद्यो भव समनीयते
लघोर्धर्मस्य संभवति गुरोः प्रतियोगितावच्छेदकत्वानंगीकारेण धूमत्वविशिष्टसमानाधिकरणात्यंताभावप्रतियोगि
तावच्छेदकत्वापेक्षया नीलधूमत्वविशिष्टसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकत्वस्य गुरुतया तदवच्छिन्न
प्रतियोगिताकाभावाप्रसिध्या तत्र तद्घटितव्याप्त्यसंभवः। एवं स्वसमानाधिकरणव्याप्यतावच्छेदकांतराघटितत्वस्यैव व्या
प्यतावच्छेदकत्वेन नीलधूमस्य धूमत्वघटितस्य तथात्वासंभवः। धूमप्रागभावत्वसंग्रहाय स्वसमानाधिकरणेति। तद्घ
टितत्वं तदविषयकप्रतीतिविषयत्वमिति बोध्यं॥ केचित्तु कंबुग्रीवादिमान्नास्तीति प्रतीतिवदेतत्प्रतीतिबलाद्गुरोरपि प्र
तियोगितावच्छेदकत्वस्वीकारेण न नीलधूमो व्याप्यत्वासिद्धः न चैवं तदुद्भावने वादिनिग्रहो न स्यादिति वाच्यं। धूमादिति व
क्तव्ये नीलधूमादित्युक्तिरनुचितेत्यधिकोक्त्या वादिनिग्रहसंभवादित्याहुः॥ उपाधिज्ञानाभावे तद्घटितसोपाधिज्ञानासंभवा
दुपाधिं लक्षयति॥ साध्येति॥ तथा चोपाध्यज्ञाने सोपाधिनिरूपणमिति भावः॥ साध्यसमव्याप्तस्यैवोपाधित्वमिति न्याया
चार्याः। तथाहि उपाधिलक्षपदं पंकजपदवद्योगरूढं। उपस्य समीपवर्तिनि स्वीयं धर्ममादधातीत्युपाधिरिति योगात्स्वनिष्ठव्याप्ति
रूपधर्मसंक्रामकत्वलब्धा। साध्यव्याप्यत्वं च न केवलसाध्यव्याप्यतामात्रेण दूषकत्वमिति साध्यव्यापकत्वेपि तथा चोक्तार्थ
एव पर्यवसानमिति॥ तन्मतं न सम्यक्। व्यभिचारोन्नायकत्वे सत्प्रतिपक्षोन्नायकत्वरूपदूषकताबीजवतो विषयव्याप्तस्यानु
पाधितापत्तेरिति दूषणं मनसि निधायाह। साध्यव्यापकत्वे सतीति। तथा च साध्यव्याप्यांशस्य परित्यागान्न तदसंग्रह इति भावः
साध्याव्यापकसाधनव्यापकयोर्वारणाय यथाक्रमं विशेषणद्वयं॥ साध्यव्यापकत्वशरीरे व्याप्तेर्निवेशगौरवादाह॥ साध्यसमा
नाधिकरणेति अप्रतियोगित्वं प्रतियोगितानवच्छेदकधर्मवत्त्वं प्रतियोगित्वं प्रतियोगितावच्छेदकधर्मवत्त्वं॥ तेन नत्त्वदृष्टिधनादीना

त.दी.टी भभावस्यद्वित्वाद्यवच्छिन्नप्रतियोगिताकाभावस्यप्रतियोगित्वेपिवह्निव्यापकद्रव्यत्वादेरपि धूमसमानाधिकरणस्यद्वित्वाद्यवच्छिन्नाभा
वस्यप्रतियोगित्वेपिनाप्रसक्तिः॥ अभावश्चप्रतियोगिव्यधिकरणोबोध्यः तेनानार्द्रेंधनसंयोगेः व्याप्तिः। तत्वंचप्रतियोगितावच्छेद
कविशिष्टप्रतियोग्यनधिकरण्यत्वसाध्याधिकरणकत्वं तेनसमवायेनद्रव्यत्वेसाध्येजातावपितेनैवसत्वेसाधनेचसंयोगगुणकर्मा
२८ न्यत्वविशिष्टत्वयोरव्याप्त्यतिव्याप्ति अन्यथाधिकरणभेदेनाभावभेदानंगीकारेनसंयोगानधिकरणगुणवृत्तिरभावस्येवसाध्यवति
सत्वाद्विशिष्टसत्तायाः शुद्धसत्ताया ऐक्याद्विशिष्टसत्ताभावस्यचप्रतियोगिव्यधिकरणत्वाभावादभावांतराप्रतियोगित्वेनोक्तदोषापत्तेः
संबंधभेदनिबंधनोदोषः प्रतियोगितयेरिकसंबंधावच्छिन्नत्वविवक्षयानिरसनीयः॥ ननुवायुःप्रत्यक्षःप्रमेयत्वादित्यादौपक्षधर्मावच्छि
न्नसाध्यव्यापकोद्भूतरूपवत्वादव्याप्तिः प्रत्यक्षत्वरूपसाध्यव्यापकत्वाभावादात्मनिव्यभिचारादतोविभागमुखेनाव्याप्तिंवारयितुं
विभजतिदीपिकायांउपाधिश्चतुर्विधइति॥ नवयंसाध्यव्यापकत्वेसतीत्युपाधिसामान्यलक्षणंब्रूमः॥ किंतुतद्विशेषणलक्षणं। उक्तत्व
त्वेतुपक्षधर्मावच्छिन्नसाध्यव्यापकत्वेसतीत्यादिकमेवेत्यतोनदोषइतित्याह॥ पक्षधर्मावच्छिन्नेत्यादि। ननुसाधनावच्छिन्नसा
ध्यव्यापकेपक्षधर्मावच्छिन्नसाध्यव्यापकत्वेकेवादव्याप्तिरतआह॥ साधनावच्छिन्नसाध्यव्यापकइति॥ तथाचात्रोपाधाविदमेवल
क्षणमितिनदोषइतिभावः ननुप्रागभावोविनाशीप्रमेयत्वादित्यादौभावत्वरूपोपाधावव्याप्तिः पक्षधर्मसाधनाभ्यामवच्छिन्नसाध्य
व्यापकत्वाभावातदआह॥ उदासीनेतिपक्षधर्मसाधनोभयभिन्नधर्मावच्छिन्नत्वमेवोदासीनधर्मावच्छिन्नत्वमित्यर्थः॥ तथाचात्रापिपूर्व
वदेवबोध्यं। यत्तुचरमप्रकारेनसंभवति॥ वह्निमान्धूमादित्यादावतिव्याप्तेः नथाहिमहानसान्यत्वरूपयत्किंचिद्धर्मावच्छिन्नसाध्यव्या
पकस्यमहानसत्वाभावादेरुपाधित्वमेवेतिएवमन्यत्रापियथानुपपत्त्यंतस्मात्स्वावच्छिन्नानधिकरणसाधनाधिकरणवृत्तियत्किंचि
दवच्छिन्नसाध्याधिकरणवृत्तयोयावंतोधर्मायद्धर्मावच्छिन्नसामानाधिकरणास्तद्धर्मवत्वंनिर्गलितोपाधिलक्षणंवक्तव्यं। इत्थंचम २८
हानसत्वाभावत्वावच्छिन्नानधिकरणहेत्वधिकरणं महानसमेवतद्वृत्तिद्रव्यत्वावच्छिन्नवह्निसमानाधिकरणयावद्धर्मांतर्गतमहानसत्वा
समानाधिकरणत्वान्नमहानसत्वाभावेतिव्याप्तिरिति॥ तदसत्। तथापिधूमवान्वह्नेरित्यादौपर्वतभेदायोगोलकभेदोभयत्वावच्छिन्न
स्यमहानसत्वादेश्चोपाधितापत्तेः॥ उभयत्वावच्छिन्नानधिकरणेसाधनाधिकरणायोगोलकवृत्तिपर्वतभेदरूपधर्मावच्छिन्न

धूमसमानाधिकरणानांसर्वेषांमुक्तोभयत्वाद्यवच्छिन्नसमानाधिकरणत्वात्॥ उक्तोपाधिषुदाहरणमुखेनलक्षणस्यसत्वंदर्शय
ति। आद्यइत्यादिना। वायुरिति। वायुःप्रत्यक्षस्पर्शाश्रयत्वादितिकृते वक्ष्यमाणसाधनावच्छिन्नसाध्यव्यापकाभिदस्यादिति॥
प्रतियेत्ययनेपर्यंतानुधावनं॥ बहिर्द्रव्यत्वावच्छिन्नमिति॥ बहिरेवाचात्मान्यत्वंमानसविषयान्यत्वंवा॥ तथाचबहिप्रत्यक्ष
त्वस्यरूपादिवृत्तित्वेनतत्ररूपाभावद्रव्यत्वनिवेशः आत्मनिव्यभिचारवारणायबहिष्टनिनिवेशः। साध्योपाध्योर्व्याप्यव्यापक
भावग्रहकार्यकारणभावरूपानुकूलतर्कस्कारणायोद्भूतेतिजन्यत्वावच्छिन्नेत्यादि। जन्यत्वंचात्रसमवायकालिकोभयसं
बंधेसत्तावत्त्वंबोध्यं अन्यथाजन्यत्वस्योपिपक्षधर्मत्वेनपूर्वाभेदस्यात्॥ वस्तुतस्तुप्रागभावोविनाशीजन्यत्वादित्यादितद्बोध्यं॥
नन्वेवमप्युक्तदोषस्थदवस्थ एवेतिचेत्॥ तत्राहुः। यद्धर्मावच्छिन्नाभावाधिकरणीभूत यत्किंचिदधिकरणावृत्तित्वसामान्यंसा
ध्यव्यभिचारव्याप्यंसाधनवृत्तितद्धर्मावच्छिन्नंतत्रोपाधिः महानसत्वाभावव्यभिचारस्यमहानसीयधूमवत्तेः साध्याव्या
प्यत्वान्नाव्याप्तिः साधनपक्षधर्मरूपावच्छेदकाधिकरणीभूततदभावाधिकरणीलक्षणव्यभिचारस्यतथात्वात्तत्रायंसमन्वयो
बोध्यइत्यलंविस्तरेण॥ उपाधेर्दूषकताबीजंव्यभिचारोन्नायकत्वंसत्प्रतिपक्षोन्नायकत्वंवात्तत्रवह्निधूमव्यभिचारिधूमव्यापारा
र्द्रेंधनव्यभिचारित्वादित्यादिरित्याबोध्यंनचहेतोःसाध्यव्यापकोपाधिव्यभिचारेणसाध्यव्यभिचारसाधनमिवोपाधोसाध्यव्यापहेत्व
व्यापकतयासाध्यव्यापकत्वसाधनमपिसंभवतिविनिगमकाभावादितिवाच्यं अनुकूलतर्कोपाधेः साध्यव्यापकतयानिश्च
यएवदूषकताबीजचिंतनमितिसंक्षेपः॥ मूलेसाध्याभावइति॥ साध्यतावच्छेदकावच्छिन्नसाध्याभावइत्यर्थः॥ सचप्रतियोगिव्य
धिकरणोबोध्यः एतत्प्रयोजनंतुस्फुटंप्रमाणांतरेति॥ प्रकृतमानातिरिक्तेनेत्यर्थः साध्याभावज्ञानेप्रामाण्यलाभदयामनुमित्यु
त्पत्तेरितिनुमांसंशय धर्मिकप्रामाण्यप्रकारकज्ञानबाधः साध्याभावज्ञानेप्रामाण्यलाभदयामनुमित्युत्पत्तेरितिनुमांसंशयनि
श्चयप्रामाण्यसाधारणाप्रामाण्यज्ञानाभावविशिष्टतादृशसाध्याभावनिश्चयस्यैवप्रतिबंधकत्वस्वीकारेलाघवात्॥ अन्य
थासत्प्रतिपक्षोप्येवमेवस्यात्॥ नचबाधस्थलेनैकांतिकादिनिपमनतेनान्यथासिद्धत्वाद्बाधोनहेत्वाभासइतिवाच्यं अगृहिते
हेत्वाभासांतरेगृहितेबाधेनमितेरनुत्पादस्यसर्वानुभवसिद्धत्वात्। उत्पत्तिकालावच्छिन्नघटेगंधवान्पृथिवीत्वादित्यादिगतेश्च

मु॰ गा॰ ननु प्रागभावकालावच्छिन्नो घटो गंधवान् पृथिवीत्वादित्यादौ साध्यव्याप्यवत्तापरामर्शात् पक्षतावच्छेदकधर्मसामानाधिकरण्यावगाहित्वादनुमितेः प्र ना
मात्वमेवेति कथं बाधः पक्षतावच्छेदकव्यापकत्वविशिष्टसंबंधेन गंधस्य व्यापकताग्रहादनुमितौ व्यापकता घटकसंबंधेन व्यापकस्य भाननियमादि
२२ चेन्न॥ अवच्छेदकावच्छेदेनानुमितावच्छेदकव्यापकत्वविशिष्टसंबंधेन व्यापकत्वावगाहिपरामर्शशुद्धसाध्यतावच्छेदकसंबंधेन व्यापकत्वावगाह्यवच्छे
दकावच्छेदेन हेतुमत्तावगाहिपरामर्शयोरन्यतरस्य जनकत्वेन गंधनिष्ठायां गंधप्रागभावावच्छिन्नत्वविशिष्टसमवायअव्यापकतायावगाहिनो परा
मर्शस्यासत्वेपि गंधप्रागभावकालावच्छिन्नत्वविशिष्टसमवायसंबंधेन हेतुमत्तावगाहिनो परामर्शस्य सत्वात्तस्या आश्रयत्वमुपपन्नमेवेत्यन्यत्र विस्तरः॥
सचायं बाधो दशविधः। धर्मिग्राहकमानबाधितं। साध्यप्रतियोगिग्राहकबाधितं॥ साध्यग्राहकबाधितं। हेतुग्राहकबाधितं चेति घटो व्यापकः सत्वादिति
ला रनुष्णः कृतकत्वाज्जलवत् नीला वह्निः पृथिवीतो विपरीतस्पर्शवत्वादित्यादौ प्रत्यक्षेण परमाणवः सावयवाः मूर्तत्वात् शब्दः श्रावणगुणत्वान्मनो विभुज्ञाना
समवायिकारणत्वादित्यादावनुमानेन गवयत्वं गवयपदप्रवृत्तिनिमित्तं जातित्वादित्यादावुपमानेन मेरुः पाषाणमयः पर्वतत्वात् शुचि नरशिरः कपालं प्राण्यंग
त्वात् शंखवत् ब्राह्मणकर्तृकसुरापानं कर्तव्यं स्वर्गसाधनत्वादित्यादौ सुवर्णमयत्वं राजसूयकर्तव्यता दिबोधकागमेनेति यथायथं सुधीभिरूहनीयमिति सं
क्षेपः उक्तदोषाणां निरुक्तलक्षणोपपादकं प्रतिबंधकत्वं दर्शयति दीपिकायां अत्रेति ग्राह्याभावनिश्चयत्वेनेति प्रतिबंधकत्वमिसग्रे तन्नेनान्वयि॥
तद्वत्ताज्ञानं प्रति तदभाववत्तानिर्णयस्य प्रतिबंधकतायाः क्लृप्तत्वादितिभावः। अत्र प्रतिबध्यतावच्छेदककोटौ निवेशनीयं लौकिकसन्निकर्षा
जन्यत्वं दोषविशेषाजन्यत्वं च तेन वा धतुत्तरसंयोगलौकिकसन्निकर्षजन्यज्ञानस्य शंखो न पीतः वंशो नोरग इति ज्ञानानंतरमपि नमंडूकवसांज २२
ना शंखः पीतः वंशोऽरग इति ज्ञानस्य चोत्पत्तावपि न क्षतिः॥ सत्प्रतिपक्षश्चेति। सत्प्रतिपक्षो विरोधिपरामर्शो यस्येति व्युत्पत्त्या स्वसाध्य
विरोधिज्ञानस्य सामग्रीकत्वं लब्धं एवं च स्वसाध्यविशिष्टनिर्णय इतिभावः। अत्ररत्नकोशकारानुयायिनस्तु घटचक्षुःसंप्रतिति द्विरोधिसाम
ग्र्याः तत्साध्यविशिष्टनिर्णयं प्रति स्वसाध्यविशिष्टनिर्णयसामग्र्या अविरोधित्वा नैकस्यापि विशिष्टनिर्णय इतिभावः अत्ररत्नकोशकारानु
यायिनस्तु घटचक्षुः संयोगेपि त्वादिदोषरूपस्वसामग्रीसत्वे सत्यपि घटाभावव्याप्यवत्ताज्ञाने पीतत्वाभावव्याप्यवत्तापरामर्शाभ्यां जायाज्ञा
नकोटिद्वयव्याप्यदर्शनेषु घटवत्ताज्ञानशंखे पीतत्ववत्ताज्ञानप्रसक्षात्मसंशयानामिव सत्प्रतिपक्षस्थले संशयरूपानुमितेरुत्पत्तावि
रूपपद्यत एव न च संशयत्वस्यार्थसमाजग्रस्तत्वात्कथं परामर्शजन्यत्वावच्छेदकत्वमिति वाच्यं। तथापि तत्तदभावव्याप्यवत्तापराम
र्शाभ्यां जायमानानां तत्तदभावानुमितीनां फलतः संशयाकारानुमितेरुपपत्तेरित्याहुः तदसत्॥ तदुपनीतभानशाब्दबोधादीनां तत्त
दभावव्याप्यवत्तादिज्ञानकालेऽनुत्पन्ने सर्वानुभवसिद्धाया निर्वाहाय तत्तदुपनीतभानत्वारूपधर्मावच्छिन्नप्रतिबंधकत्वकल्पने गौर

वात्॥ लाघवाच्च लौकिकसंनिकर्षाजन्यज्ञानदोषविशेषाजन्यज्ञानत्वावच्छिन्नं प्रति तथात्वकल्पनमेवोचितमिति कथं संशयाकारानुमितिः।
अनुमितिभिन्नत्वरूपविशेषणस्य लौकिकसन्निकर्षस्थले प्रत्यक्षाभिव सत्प्रतिपक्षस्थले संशयरूपानुमितेर्विवादग्रस्ततया दानानोचिस
व तरात्। संशयस्यैककोटिद्वयव्याप्यवत्ताज्ञाने ऽप्रामाण्यज्ञानादेरस्वीकारान्नाकापि क्षतिरित्येवासिद्धांतिभिसरणिरिति॥ र
तरेषां साधारण्यादीनां तत्रापि परामर्शप्रतिबंधकसाधारण्यादिष्वपि साधारण्यश्चेति॥ व्याप्तिज्ञानप्रतिबंधकत्वमि
त्यग्रे तन्नेनान्वयि। एवमग्रेपि। अव्यभिचाराभावरूपतया व्यभिचारतया विरुद्धश्चेति। सामानाधिकरण्याभावरूप
तयेति। नवीनमताभिप्रायेण संप्रदायमते तु हेतौ साध्याभावव्याप्यवत्ताज्ञाने तुल्यवित्तिवेद्यतया साध्येपि हेतु
समानाधिकरणाभावप्रतियोगित्वज्ञानेन व्यापकत्वज्ञानासंभवाद्व्यापकसमानाधिकरण्यरूपव्याप्तिग्रह प्रतिबंधः क
ल्पितो बोध्यं विशिष्टव्याप्यपक्षभावत्वया। व्यापकतावच्छेदकविशिष्टनिरूपितसामानाधिकरण्याभावस्तयातादृशसा
मानाधिकरण्यविशिष्टहेतुतावच्छेदकाभावतया साधारण्यव्याप्यत्वासिद्धयोश्च साध्यतावच्छेदके साधनसमानाधि
करणाभावप्रतियोगितानवच्छेदकत्वस्य साध्याभाववद्वृत्तित्वस्य व्याप्तित्वेपि साधारणस्य तादृशावृत्तित्वप्रकारकज्ञा
नत्वेन व्याप्यत्वासिद्धेश्च तादृशसाध्याभाववद्वृत्तित्वाभावप्रकारकज्ञाने च प्रतिबंधकत्वान्न द्वितीयेपि दोषो वक्तव्यः इ
ति। व्याप्तिसंशयाधायकत्वेन चेति। साधनेनिश्चितसाध्यवद्वृत्तित्वादिना ज्ञाने पक्षे साध्यसंदेहे व्यापकसामा
नाधिकरण्यरूपव्याप्तिनिश्चयासंभवादिति भावः एवमनुपसंहारिण्यपि सर्वस्यापि पक्षत्वेन तन्निश्चयासंभवादिति
बोध्यं असाधारणसत्प्रतिपक्षो व्यापकतया पृथक् हेतुभेदे सत्प्रतिपक्षो हेत्वेक्ये साधारण इति विवेकः इति केचि
त्। पक्षधर्मताज्ञानप्रतिबंधकत्वमिति। पक्षे पक्षतावच्छेदकविरहनिश्चये हेतौ पक्षतावच्छेदकविशिष्टपक्षसं
बंधस्य ग्रहासंभवादिति भावः। स्वरूपासिद्धिस्थले तत्प्रतिबंधकत्वं स्फुटमेव। नन्वनुमितिविरोधित्वविशिष्टप
रामर्शविरोधित्वयोर्दूषकताबीजयोर्द्वयोरेवसाम्याद्द्विविधमेव हेत्वाभासः स्यादिति चेन्न। स्वतंत्रेच्छस्य ऋषेर्नियोक्तु
मशक्यत्वात्। ननु हेत्वाभासस्य पंचत्वोक्तिरसंगता व्यभिचारिज्ञानद्वारा उपाधेरप्यनुमितिप्रतिबंधकस्य सत्वादत
आह। उपाधिस्त्विति। तु शब्दो वैलक्षण्यार्थः। तदेवाह। व्यभिचारेत्यादि। तथा च व्यभिचारज्ञानद्वारा प्रतिबंधकः
ननु व्यभिचारज्ञानवदिति परमुखनिरीक्ष्यकत्वेन नोपाधेर्हेत्वाभासत्वमिति भावः। ननु तथापि सिद्धिसत्
त्वेऽनुमितिरनुत्पत्तेः सिद्धेरपि हेत्वाभासत्वमिति कथं हेत्वाभासानां पंचत्वकथनमित्याशंक्य। कावाचीनमते

त॰ दी॰ टी॰ इष्टापत्त्यापरिहरति सिद्धसाधनमिति। तद्द्विविभागव्याघातरसनमाह। आश्रयासिद्ध इति। तथा च सिद्धस
त्वेपक्षतायासंभवेन पक्षत्वविशिष्टपक्षसंबंधस्याहेतावसंभवात्पक्षधर्मतात्वात्मना प्रतिबंधकत्वेन तच्चा
२२ तर्भावसंभवान्न तद्व्याघात इति भावः अत्र सिद्धसाधनं न हेत्वाभासः साक्षादनुमितितत्कारणान्यतरप्रति
बंधकत्वाभावात् सामग्र्यां सिद्धावपि इच्छायां चानुमितिदर्शनात्। ननु सिद्धसाधनं कथं साक्षादप्रतिबंधकमिति चे
दित्थं। सत्यां च सिद्धौ पक्षताया अभावेन पक्षताविघटनद्वारा पक्षधर्मतानं प्रतिबध्नातीति। न चोक्तयुक्त्या त
स्याश्रयासिद्धित्वमेवेति वाच्यं सिद्धसाधनस्य क्वचिदाश्रयासिद्धिं प्रत्युपजीव्यत्वात्। न ह्युपजीव्यस्योपजीव्यके
तर्भावः तथाहि सिध्याभावपक्षताविरहहस्तेन पक्षे पर्वतादौ पक्षतावच्छेदकविरहः इति। तस्मादुपाधिवत्सरमु
खनिरीक्ष्यकत्वेन न सिद्धसाधनं हेत्वाभासः किंतु निग्रहस्थानांतरमित्येवेसत्स्वरसं प्रदायमतेद्विनिधा
यनथीनमतमाह॥ निग्रहस्थानांतरमिति यथा निग्रहस्थानांतरं सिद्धसाधनं तथाग्रे वक्ष्यामि इति संक्षे
पः। इति श्रीमद्विद्वद्वृंदशिरोमणिश्रीमत्सोमाचार्यसुतेन कुरुगोडुपनामकहनुमत्सुख्यावता विरचितायां तर्कसंग्रहदीपिकाप्रभायामनु
मानपरिच्छेदः समाप्तः॥ श्रीभुवनेश्वर्यैनमः॥ अवसरसंगतिमभिप्रेत्याह॥ उपमानमिति॥ उपमितिस्वरूपं व्युत्पादयति॥ मूलेसं २२
ज्ञेति॥ संज्ञा गवयपदं संज्ञि गवयः॥ तयोः संबंधः शक्तिः॥ तद्ज्ञानं। तन्निर्णयः॥ तथा च शक्तिपरिच्छित्तिरेवोपमितिरित्यर्थः। इदं च
स्वरूपकीर्तनमात्रं न तु लक्षणं। शक्तिनिर्णयत्वस्यातिप्रसक्तत्वात् कार्यतावच्छेदकत्वाच्च किं तु अनिर्णीतानुव्यवसायगम्यप्रत्य
क्षादिव्यावृत्तजातिविशेष एव। संज्ञा गवयः संज्ञी गौः तयोः संबंधः सादृश्याख्य एव। तद्ज्ञानमुपमितिरिति केचित्। तदस
त्। असौ गवयपदवाच्य इत्युत्तरग्रंथासंगतेः। तेन सादृश्याप्रतिपादनात्। न च सादृश्यस्य गोसदृश इत्यर्थकतया न दोष
इति वाच्यं तर्ह्युपमानस्यातिरिक्तप्रमाणत्वं वदन्कथं न भ्रांतो भवेत्॥ तथाहि॥ तथा सति नियमेनोपमितेः सादृश्यवि
षयकत्वेन तत्पदजन्य तदुपस्थिते सत्वाच्छाब्दबोधत्वापगमे बाधकाभावः॥ सादृश्याविषयकत्वेतु ग
वयत्वावच्छेदेनैव गवयपदशक्तिग्रहा ——— ॥